ISSN 2278 - 0688
Volume - XV

# ऋतायनी

## A REFEREED RESEARCH JOURNAL OF SANSKRIT

Purulia , West Bengal

CS CamScanner

ISSN 2278 - 0688
Volume- XV
April 2019

# ऋतायनी

A REFEREED RESEARCH JOURNAL OF SANSKRIT

**Chief Editor**
**Dr. Chandrakanta Panda**

**Editor**
**Dr. Jagamohan Acharya**

**Associate Editors**
Dr. Buddheswar Sarangi
Dr. Jogeswar Mahanta
Sushant Pradhan

Purulia , West Bengal

CamScanner

UGC APPROVED REFEREED RESEARCH JOURNAL OF SANSKRIT
(U.G.C. Approved, Journal No.40947)
ISSN 2278 - 0688
Volume -XV
April 2019

# ऋतायनी (RITAAYANI)

**Publishers:** Dr.Jagamohan Acharya,Kharagpur, West Bengal
**Printers:**

**Board of Advisors**

Professor Harihara Hota, Vice-Chancellor, SJSV, Puri
Professor Chakradhar Behera, Pondicherry
Professor Arun Ranjan Mishra, Santiniketan
Professor Banamali Biswal, Devprayag, Uttarakhand
Professor Subash Chandra Dash, Utkal University, Bhubaneswar

**Hon'ble Referees**

Dr. Manoranjan Senapati, Utkal University, Bhubaneswar
Dr. Buddheswar Sarangi, SVAS Mahavidyalaya, Kolkata

**Chief Editor**

Dr. Chandrakanta Panda
B.T.M. College, Barabhum , Barabazar
Purulia,723127, West Bengal

**Editor**

Dr. Jagamohan Acharya
Department of Sanskrit, Kharagpur College, Inda, Kharagpur,
Paschim Medinipur, 721305, West Bengal

**Associate Editors**

Dr. Buddheswar Sarangi
SVAS Mahavidyalaya, Kolkata
Dr. Jogeswar Mahanta, SJSV, Puri
B.T.M. College,Barabazar, Purulia,West Bengal
Sushant Pradhan
Research Scholar, Utkal University

**Price Rs.300/-**

Volume- XV April-2019 ISSN 2278 - 0688

# CONTENTS


| | | | |
|---|---|---|---|
| 1. | भारतवर्षमित्यस्य संस्कृतानूदितकाव्यस्य लोकोपयोगित्वम् | डा.भारतभूषणरथः गीताञ्जलित्रिपाठा | 1 |
| 2. | सिद्धान्तकौमुद्यां प्रतिफलिता प्राचीनशिक्षाव्यवस्था | | 7 |
| 3. | Some Ideal woman in ancient India | Dr. Samapti Garai | 14 |
| 4. | Kingship in ancient India | Sanchita Kundu | 24 |
| 5. | आचार्य रघुनन्दनविरचित शुद्धितत्त्वग्रन्थौ प्रतिपादित द्रव्यशुद्धिप्रकारः | बावलुप्रामानिकः | 35 |
| 6. | Purusartha : Its Present day Relevance | Dr. Bibhuti Bhusan Nayak | 47 |
| 7. | Position of Sanskritic learning from past to present in India | Dr. Bidisha Misra | 55 |
| 8. | Forms of marriage in Manusmruti and Court of Law | Dr Anusuya Prusty | 60 |
| 9. | Importance of principal Upanisads | Namita Kumari Naik | 70 |
| 10. | Natural Disaster and its Management in Kautilya's Arthasastra | Soma Bandyopadhyay | 78 |
| 11. | The definitions and characteristics of muktaka as mentioned by the different Sanskrit rhetoricians | Dr. Pratim Bhattacharya | 85 |
| 12. | श्रीमदभागवतं नाम पूराणं विश्वविश्रुतम् | श्रीमती सुकन्या सेनापति | 90 |
| 13. | न्यायनये मुक्तिकारणविचारः | डां. मनोरञ्जन-दासः | 94 |
| 14. | शिशुपालवध-महाकाव्ये माघस्य संगीतचेतना | ड. शीला चक्रवता | 97 |
| 15. | वैदिकशब्दानां रहस्यात्मकं निर्वचनम् | ड्.जगमोहन आचार्यः | 101 |
| 16. | Agriculture and Management in Arthasastra | Kabita Ray | 109 |
| 17. | Concept of Environment and Environmental Awareness in Ancient Indian Literature – A Succinct Review | Dr. Partha Pratim Roy | 113 |
| 18. | विधौ संज्ञासूत्राणां प्रवृत्तिप्रकारः | शम्भु मान्ना | 118 |
| 19. | Creation: A Study on Christianity and Hinduism | Mrs. Mrinmoyee Samanta | 124 |
| 20. | Music in Gitagovinda | Dr. Santanu Mandal | 131 |
| 21 | वामनपुराणे मोक्षस्य अवधारणा | तरणीकुमारपण्डा | 135 |
| 22. | अष्टाङ्गयोगदिशा यमस्याधारेण मानवीयमूल्यबोधः | दीपाञ्जलिभञ्जः | 143 |


CamScanner

# विधौ संज्ञासूत्राणां प्रवृत्तिप्रकार:

शम्भु मान्ना

भावाभिव्यक्तये सत्सु नैकेषु उपायेषु भाषाया: प्रामुख्यं सर्ववादिसम्मतम्। भाषा तु शब्दमयी। शब्दाश्च साधुशब्दा: अपशब्दाश्चेति भेदेन द्विविधा:। यद्यपि साधुशब्देभ्य: इव असाधुशब्देभ्य: अर्थबोध: भवति तन्माम अभयत्र वाचकत्वं प्रसिद्धं, तथापि पुण्यपापयो: प्रसङ्गे समागते साधुशब्देन भावाभिव्यक्ति: पुण्याय। असाधुशब्देभ्यश्च भावाभिव्यक्ति: पापाय इति। अस्यामेव अवस्थायां शब्दापशाब्दयो: ज्ञाने किं साधनं इति चेत् व्याकरणमिति सर्वेषां ऐकमत्यम्। व्याकरणं हि शब्दानुशासनम्। शब्दानुसनमिति अन्वर्थं नाम। व्याकरणेन साध्वसाधुप्रविभाग: निपुणं विज्ञायते। अताएव साधुशब्दज्ञानं व्याकारणज्ञानाधीनम् इति स्थिति: इतिहासपर्यालोचनेन ऐन्द्रादिभेदेन इदानीं यावत् बहुविधं व्याकरणं श्रुयते दृश्यते च। परन्तु तन्मध्ये लोकवेदोभयोपकारकत्वेन पाणिनीयं व्याकरणमद्यत्वे वरीवर्ति। पाणिनीयं व्याकरणं नाम त्रिमुनि व्याकरणम् इति सर्वै: अवगम्यते। सूत्रं वार्त्तिकं भाष्यञ्चेति त्रितयं पाणिनीयं व्याकरणम् उच्यते।

अत्रादौ पाणिनिनिर्मिता अष्टाध्यायी भाष्यवार्त्तिकयो: उपजीव्यभूता। अष्टाध्यायी तु सूत्रात्मिका। अष्टाध्यायीगतं सूत्रं तु संज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदेन षड्विधम्। अत्रादौ आयाति संज्ञासूत्रम्। महत्या सूक्ष्मेक्षिकया पाणिनिप्रणीता इयम् अष्टाध्यायी संज्ञासूत्रादेव समारब्धातत्र संज्ञासूत्राणां महत्त्वमधिकतया प्रतिभाति, तदाभावे अष्टाध्याय्या: अपूर्णत्वं जायते। तत्र सर्वं सूत्रं संज्ञासूत्राणां महत्वमधिकतया प्रतिभाति, तदाभावे अष्टाध्याय्या: अपूर्णत्वं जायते। तत्र सर्वं सूत्रं संज्ञासूत्राबद्धं प्रत्यक्षरुपेण परोक्षरुपेण वा। संज्ञाहीनपदार्थस्य जगति व्यवहारसम्भवात् प्रत्येकं पदार्था: यथा संज्ञया साकं युत्का: भवन्ति तथैव इदं व्याकरणजगदपि संज्ञया सह युक्तं भवति। जगति संज्ञयान्येषामुपकारकारकमिव शास्त्रेऽस्मिन् संज्ञासूत्रै: एभि: षड्विधेषु सूत्रेषु विधिसूत्राणाम् उपकारकत्वं विधीयते। परन्तु कथं संज्ञासूत्राणि विधिसूत्राणाम् उपकारकाणि इति जिज्ञासायां नागेशेनोक्तात् यथोद्देश्यं संज्ञापरिभाषम् कार्यकालं संज्ञापरिभाषम् चेति परिभाषाद्वयात् प्राप्तं यथोद्देश्यं कार्यकालं चेति पक्षद्वयमाश्रित्य एवोपकारकत्वं प्रतिभाति। अत: यथोद्देयपक्षे कार्यकालपक्षे च संज्ञासूत्राणि विधिसूत्राणाम् उपकारकाणि भवन्ति। तथाहि परिभाषाया: अस्या: व्याख्यानावसरेबालबोधिनीटीकायामुक्तम्—विधिशास्त्रीयवाक्यार्थबोधोपकारकत्वं संज्ञापरिभाषयो: परमं प्रयोजनम्[१] इति वैयाकरणै: नीलकण्ठमतानुसारं लक्ष्यानुरोधेन इप्सितप्रयोगानां वा साधुत्वप्रतिपादनर्थमुक्तात् परिभाषाद्वयत: कापि एका निर्णायते। एवञ्च संज्ञाशास्त्रप्रयोज्यविध्युपकारविषये पक्षद्वयस्याद्यपक्ष: यथोद्देश्यमिति। उद्देश्यमनतिक्रम्य इति लौकिकविग्रहेण यथासादृश्ये (२/१/७) इत्यनेन यथार्थे यथोद्देश्यमिति अव्ययीभावसमास:।



CamScanner

अनतिक्रम्य इत्यत्र नञ्तत्पुरुषसमासात् परावरयोगे च (३/४/२०) इति क्त्वाप्रत्ययस्य ल्यबादेशः भवति। उपदेशदेशः हि उद्देश्यपदार्थः। ततश्च कोऽयमुपदेशः इति जिज्ञासायामुच्चारणकालस्तथा पाणिनिकर्तृकाद्युच्चारणकाले इत्यर्थः बोध्यते। परन्तु इदानीं तस्य उच्चारणकालस्य असम्भवात् अष्टाध्यायीपौर्वापर्यमाश्रित्य उपदेशदेशः वेदितव्यः इति तात्पर्यम्। उद्देश्यशब्दस्य भावघञन्तत्वात् अधिकरणार्थाभावात् उद्दिश्यते उपदिश्यते अस्मिन्नित्यर्थे उपपूर्वकदिशधातोः बाहुलकादधिकरणे घञि निष्पन्नस्य उपदेशदेशशब्दस्य अधिकरणार्थः स्वीक्रियते। प्रत्यक्षस्य यत् आख्यानं तदुपदेशः गुणैः च प्रापणं हि उद्देशः इत्यनयोः पार्थक्यमस्ति। पृथकत्वेऽनयोः कथं उद्देशशब्दः उपदेशार्थकः इति संप्रश्ने उपदिष्टो मेऽनुवाकः, उपदिष्टो मे पन्थाः इति तयोः क्वचित् साङ्कर्यस्यापि दर्शनात् तत् सम्भवति। तर्हि संज्ञा उपदेशदेशे एव स्थित्वा विधिशास्त्रमुपकरोतीति यथोद्देशपक्षे, कार्येण काल्यते स्वसन्निधिं प्राप्यते इति व्युत्पत्या कार्यकालमित्यनेन च यत्र कार्यः तत्रैव सूत्रोपस्थापनेन तत् साधयतीति कार्यकालपक्षः। जगत्यस्मिन् छात्रो द्विविधः। द्विविधं छात्रमिदमाधारीकृत्य यथोद्देश्यं कार्यकाञ्चेति पक्षद्वयमूदेति। यथा – एकः छात्रः अन्धश्रद्धालुः गुरुणा यदुपदिश्यते तदवश्यमेव मम प्रयोजनमिति मत्वा यत्रोदिश्यते तत्रैव तत्ग्रणं तेन छात्रेण क्रियते। यथा वृद्धिरादैच् (१/१/१) इति सुत्रं प्रथमाध्यायस्य प्रथमपादे एकसंख्यात्मकेनोपस्थितं भवति। अदेङ्गुण (१/१/२)इति च प्रथमाध्स्यस्य प्रथमपादे द्वितीयसंख्यात्वेन। एवं प्रत्येकं संज्ञासूत्राणां स्थानं निर्दिष्टम्। अतएव तत्तत्स्थाने अदेङ्गुणः (१/१/२), वृद्धिरादैच् (१/१/१) इत्यादिसंज्ञासूत्राणां वाक्यार्थे गुरुणा अध्यापिते भविष्यति किञ्चिदनेन प्रयोजनम् इति मत्वा संज्ञादेशे एव यथाश्रुतं तथैव गृह्णाति। एतादृशः संज्ञादेशः एव वाक्यार्थबोधशीलछात्रस्य कृते यथोद्देश्यपक्षः। अस्मिन् पक्षे संज्ञादेशे एव वाक्यर्थबोधः जायते।

अपरः छात्रस्तु पूर्वछात्रवत् गुरुं प्रति न अन्धश्रद्धालुः। किन्तु फलानुरोधेनैव गुरुवाक्येऽपि तत्भवति। प्रयोजनं फलं वा विना कोऽपि जनः कस्मिन्नपि कार्ये न प्रवर्तते कार्ये न प्रवर्तते इति मन्यमानजनवदत्रापि। एतादृशः वृद्धिरादैच् (१/१/१), अदेङ्गुणः (१/१/२) इत्यादिसंज्ञासूत्राणां तत्तद्देशे वाक्यार्थे गुरुणा पाठितेऽपि तत्र लक्ष्यसिद्धिरुपं प्रयोजनमदृष्ट्वा न अनेन किमपि मम इष्टसाधनं भविष्यति इति मत्वा तत्तत्संदेशे तत्तत्वाक्यार्थबोधमुपेक्षते। अतः तत्तद्देशे संज्ञासूत्राणां दृढ़तरसंस्काराभावात् वृद्धिरेचि (६/१/८८) इत्यादिविधिसूत्राणां वाक्यार्थबोधकाले वृद्धिपदेन किं गृह्यते ? इत्यादिजिज्ञासायां वृद्धिरादैच् (१/१/१) इत्यादिसंज्ञासूत्रं विधिसुत्रप्रदेशमानीय पदैकवाक्यत्वेन वाक्यार्थः बुध्यते इत्यनेन प्रकारेण कार्यकालपक्षः कैयटमतापेक्षतया सिद्धः। तथाहि तेन इदूदेद्द्विवचनं प्रगृह्यम् (१/१/११) इति सुत्रस्य भाष्ये लिखितं यत् - यथोद्देशपक्षाश्रयेण परिहारः। कथं पुनरयं पक्षः, यावता कार्यार्थत्वात्संज्ञापरिभाषस्य कार्यकालतैव न्याय्या। नैषः दोषः। यदाऽनुद्दिश्यते प्रयोजनविशेषं प्रयोजनमात्रमभिसंधाय भविष्यति किञ्चिदनेन प्रयोजनमिति

संज्ञापरिभाषं प्रणीयते, तदा सम्भवत्येवायं पक्षो यथाश्रुतग्राहिप्रतिपत्रपेक्षः। महावाक्यार्थपर्यालोचनप्रवृत्तप्रतिपत्रपेक्षस्तु कार्यकालपक्षः[२] इति। अतएव तन्मतानुसारं यथोद्देशकार्यकालपक्षयोः मन्दमध्यमाधिकार्यपेक्ष आद्यपक्षः उत्तमाधिकार्यपेक्षः च द्वितीयपक्षः इति। एवं कः यथोद्देश्यपक्षः ? कः कार्यकालपक्षः ? इति पक्षद्वयस्यालोचनानन्तरं विधिसूत्रेषु तेषां संज्ञासूत्राणां पक्षद्वयभेदे नाम यथोद्देश्यपक्षे कार्यकालपक्षे च कथमुपकारकत्वमिति अधः क्रमिकतया आलोच्यते।

**प्रथमतः यथोद्देशपक्षे संज्ञासूत्रस्य विध्युपकारकत्वम्**

यथोद्देशपक्षे संज्ञासूत्राणाम् उपदेशदेशे एव वाक्यार्थबोधः जायते। यथा – वृद्धिरादैच् (१/१/१) इत्यादिकं संज्ञासूत्रम् अष्टाध्याय्यां यस्मिन् देशे उपदिष्टं तत्रैव वुद्धिपदमादैक्षु शक्तम् इत्यादिशक्तिग्रहेण वाक्यार्थबोधः भवति। अतएव पक्षेऽस्मिन् स्वदेशे एव वृद्धिरादैच् अदेङ्गुणः (१/१/२) इत्यादिसंज्ञासूत्राणां शक्तिग्रहानन्तरं तत्र कस्या अप्याकाङ्क्षाया अभावेन तद्देशे विधिशास्त्राणामनुपस्थितिर्भवति। पश्चात् वृद्धिपदघटितेषु मृजेवृद्धिः (७/२/११४) इत्यादिविधिसूत्रेषु वृद्धिपदश्रवणद्वारा संज्ञाशास्त्रजन्यशक्तिस्मरणेन भिन्नवाक्यतया लक्ष्यसंस्कारकमहावाक्यार्थबोधः जायते इत्यस्मिन् पक्षे संज्ञासूत्राणां स्वदेशीयत्वं, विधिप्रदेशे लच्छक्तिस्मरणेन वाक्यैकवाक्यतया विध्युपकारकत्वञ्च सिद्धम्। अपि च पक्षेऽस्मिन् संज्ञाशास्त्राणां त्रिपाद्यामपि प्रवृत्ते सर्वविधिशास्त्रोपकारकत्वमपि प्रतीयते। पथाहि परिभाषाद्वयस्यास्य व्याख्याने नागेशेन उक्तम्–

'पदादिसंज्ञानां जातशक्तिग्रहेणैव त्रिपाद्यामपि व्यवहारः'[३] इति। प्रगृह्यसंज्ञाप्रकरणस्य भाष्ये पक्षस्यास्य संकेतः परिलक्ष्यते। अत्र पक्षे संज्ञासूत्राणां स्वदेशे वाक्यर्थबोधात् 'आगच्छतम् अग्नी३' इत्यत्र प्रयोगे प्लुतः प्रगृह्यश्चेति संज्ञाद्वयस्य युगपत् प्राप्तौ 'ईदूदेद्द्विवचनं प्रगृह्यम्' (१/१/११) इति सूत्रदृष्या 'दूराद्धूते च' (८/२/८४) इति प्लुतविधायकस्य सूत्रस्य असिद्धत्वेन प्रगृह्यसंज्ञायां सत्यां अनुनासिकाभावः जायते। मन्यते कार्यकालपक्षश्चेत् प्रगृह्यसंज्ञायाः 'अणोऽप्रगृहस्यानुनासिकः'(६/४/५७) इति एतद्देशीयत्वेन तद्दृष्ट्या प्लुतस्यासिद्धत्वं न प्राप्नोतीति अवस्थायां प्रगृह्यसंज्ञाभावत्वं 'अप्रगृह्यःअण्' इत्यस्य च प्राप्तौ उपर्युक्ते प्रयोगे अनुनासिकत्वापत्तिः स्यादिति यथोद्देशपक्षस्य पुष्टिं विदधाति। 'आकड़ारादेका संज्ञा' (१/४/१) इति सूत्राधिकारस्थभपदसंज्ञाविषये उक्तः पक्षः एव भवतीत्येतदर्थं एतासु संज्ञासु वाध्यवाधकभावः उपदेशमाश्रित्य भवति। आकड़ारीयसंज्ञायाः कार्यकालपक्षश्चेत् उपादानसंज्ञायाः 'अपादाने पञ्चमी' (२/३/२८) इत्येतद्देशीयत्वेन 'कर्मणि द्वितीया' (२/३/२) इत्येदद्देशीयकर्मसज्ञातः स्वयमेव परत्वं प्राप्नोतीति स्थितौ कर्मादिसंज्ञया अपादानसंज्ञा बाध्यते इति भाष्यवचनमसंगतम् स्यात्।

## द्वितीयतः कार्यकालपक्षे संज्ञासूत्रस्य विध्युपकारकत्वम्

यथोद्देशपक्षे 'वृद्धिरादैच' (१/१/१) इत्यादिसंज्ञासूत्राणां सामान्यतः वाक्यार्थबोधे जाते उत्थिताकाङ्क्षायाः कस्या अप्यभावेन तत्र विधिसूत्राणामनुपस्थितिः। किन्तु विधिदेशे गृहीतशक्तिस्मरणेन तैः साकं वाक्यैकवाक्यतया वाक्यार्थबोधः जायते। अस्मिन् कार्यकालपक्षे तु संज्ञाशास्त्रस्य उपदेशदेशे न कश्चिद्वाक्यार्थबोधः। किन्तु बिधिप्रदेशै एव वाक्यैकवाक्यतया वाक्यार्थबोधः भवति। यथा-प्रक्रियाज्ञानाय 'मृजेर्वृद्धिः' (७/२/११४) इत्यादीनां विधिशास्त्राणां प्रथमतः उपस्थितौ मृजेर्वृद्धिः भवतीति सामान्यत वाक्यार्थबोधे जाते वृद्धिपदार्थजिज्ञासायां वृद्धिरादैच् इति संज्ञासूत्रं तत्रोपतिष्ठते ततः तेन सह वाक्येकवाक्यतया उपजीव्योपजीवकभावसम्बन्धेन लक्ष्यसंस्कारकमहावाक्यार्थबोधः जायते इति संज्ञासूत्राणां पक्षेऽस्मिन् भिन्नवाक्यतया विध्युपकारकत्वं भवति। किन्तु कैयटमतेन पदैकवाक्यतया विध्युपकारकत्वमिति। संज्ञासूत्रस्य विधिसूत्रोपकारकत्वेन उपजीव्यत्व विधिसूत्रस्य च तस्मात् उपकृतत्वात् उपजीवकत्वं प्रतीयते। अत्र पक्षे विधिदेशे संज्ञासूत्रस्य सफलवाक्यार्थबोधधात् संज्ञासूत्रदेशस्य विधिदेशीयत्वमिति तद्देशमेव आधारीकृत्य सिद्धत्वासिद्धत्वसम्बन्धिसूत्रस्य परस्परं विचारः स्यात्। अस्य फलं भवति यत् 'अणोऽप्रगृह्यस्यानुनासिकः' (६/४/५७) इत्यनेन सह 'अदसोमात्' (८/२/८०) इत्यस्य एकवाक्यत्वे 'अदसो मात्' (८/२/८०) इत्यस्य देशस्य 'अणोऽप्रगृह्यस्यानुनासिकः' (६/४/५७) इति एतद्देशीयत्वे एतदृष्टया 'अदसोऽसेर्दादुदो मः' (८/२/८०) इतस्य असिद्धत्वाभावे 'अमी' इत्यस्मिन् प्रयोगे 'अणोऽप्रगृह्यस्य' इत्यनेन अनुनासिकाभावत्वं जायते। किन्तु अनुनासिककरणसमये अनुनासिकविधायकसूत्रे पठितस्य 'अप्रगृह्यः' इति शब्दस्य प्रतियोगित्वेन आगतप्रगृह्यशब्दज्ञानमपेक्षते इत्येतदर्थं 'अदसोमात्' (१/१/१२) इति प्रगृह्यसंज्ञाविधायकसूत्रस्य 'अणोऽप्रगृह्यस्यानुनासिकः' (६/४/५७) इत्येतद्देशगमनं स्यात्। तत्र गमने सूत्रस्यास्य स्वयं 'एत इद् बहुवचने' इति ईत्वविधायकसूत्रात् परत्वेन त्रिपादीस्थत्वं जातम्। तेन ईत्वमत्वासिद्धत्वाभावे तस्य च प्रगृह्यसंज्ञा जायते। अतः फलरुपेण 'अप्रगृह्यः अण्' इत्यस्य प्राप्तौ अनुनासिकत्वं जातमिति कथनं स्पष्टीक्रियते यत् कस्यापि कार्यार्थं सूत्रस्यासिद्धता भवतीत्यस्मात् कार्यज्ञानोत्तरमेव सूत्रस्य प्रवृत्तिः। प्रदेशदेशः नाम विधिदेशः तत्र हि कार्यज्ञानम्। तेन 'अणोऽप्रगृह्यस्यानुनासिकः' (६/४/५७) इति अस्मद्देशगतस्य 'अदसो मात्' (८/२/८०) इति सूत्रस्य स्वयं परत्वेन त्रिपादीस्थत्वे इत्वमत्वविधायकं प्रति असिद्धत्वात् 'पूर्वत्रासिद्धम्' (८/२/१) इत्यस्य पूर्वशब्दात् तस्य ग्रहणाभावः स्यात्। विधिदेशे संज्ञादेशे संज्ञासूत्राणां वाक्यार्थबोधानन्तरं सूत्रस्य पारस्परिकविरोधस्य विचारात् विधिदेशीयपरत्वमेव 'विप्रतिषेधे परं कार्यम्' (१/४/२) इति सूत्रप्रवृत्तेः कारणमित्यस्मात् 'अदसो मात्' (८/२/८०) इति सूत्रस्य भाष्ये कार्यकालपक्षे 'अयादिभ्यः परैव प्रगृह्यसंज्ञा' इत्युक्तं भाष्यकारेण। अस्य तात्पर्यमिदं यत् 'अदसोमात्' (८/



CamScanner

२/८०) इत्यस्य सूत्रस्य भाष्ये भाष्यकारेण विचार्य्यते 'अमी अत्र', 'अमी आसते', 'अमू अत्र' अमू आसाते इत्यादिप्रयोगे यत्र मकारात् परस्थितस्य इ-कारस्य ऊ-कारस्य च प्रहृह्यसंज्ञा भवति तत्र 'अदसो मात्'(८/२/८०) इति दृष्ट्या इत्यादिविधायकसत्रस्य असिद्धत्वे अमी इत्यस्य स्थाने अदे अम इत्यस्य च स्थाने अदौ इत्येवं परिलक्षितं स्यादित्यवस्थायामत्र प्राप्तायादीनां निषेधकर्तव्ये भाष्यकारेण उपाय: एक: प्रदर्शित: यथा 'परा प्रगृह्यसंज्ञा' अर्थात् कार्यकालपक्षे 'अदसो मात्' (८/२/८०) इति सूत्रस्य 'प्लुत प्रगृह्या अचि नित्यम्ट (६/१/१२५) इत्यस्मिन् देशे गमने अयाद्यपेक्षया 'अदसो मात्' (८/२/८०) इत्यस्य परत्वात् प्रगृह्यसंज्ञया अयादि बाध्यते इत्यस्मात् भाष्यात् कार्यकालपक्षे संज्ञासूत्राणां विधिदेशीयत्वं सिद्धम्।

अन्ततो गत्वा एवं प्रतिभाति यत् यथोद्देशपक्षे संज्ञासूत्रस्य स्वदेशे एव वाक्यार्थबोध:। तत: विधिदेशे संज्ञाशास्त्रजन्यशक्तिस्मरणेन वाक्यैकवाक्यतया विध्युपकारकत्वम्। कार्यकालपक्षे तु संज्ञासूत्रस्य विधिदेशीयत्वं पदैकवाक्यतया विध्युपकारकत्वमिति कैयटमतम्। किन्त्वत्र पक्षे वाक्येकवाक्यतया अन्वय: इति नव्यानामाशय:।

**टीका**

१. परिभाषेन्दुशेखर: (सम्पा. सत्यनारायनमूर्ति) बालवबोधिनीटीका. पृ. – ११

२. व्याकरणमहाभाष्यम् (सम्पा. भार्गवशास्त्री) प्रथमखण्ड: पृ.-२६०

३. परिभाषेन्दुशेखर: (सम्पा. हर्षनाथमिश्र) पृ-३५

**परिशीलिता ग्रन्थानुक्रमणी**


१. अष्टाध्यायी मन्थन इति ग्रन्थ: सत्यमानन्दब्रह्मचारिणा सम्पादित:, सम्पूर्णनन्दसंस्कृतविश्वविद्यालय:, वाराणसी, २००६

२. कथिका जयादित्यवामनविरचिता, जयशङ्करलालत्रिपाठी इत्यनेन सम्पादिता सुधाकरमालवीयश्च, तारा-वुक्-एजेन्सी, वाराणसी, २००१ (प्रथमसंस्करणम्, पुनर्मुद्रणम्)

३. परिभाषेन्दुशेखर: नागेशभट्टकृत:, विजयाख्यव्याख्याया समलङ्कृत:, जयदेवशर्ममिश्र: इत्यनेन व्याख्यात:, चौखम्बा विद्याभवनम् वाराणसी, २००१.

४. परिभाषेन्दुशेखर: नागेशभट्टप्रणीत:, चन्द्रिकाबालबोधिनीटीकोपेत:, सत्यनारायणमूर्तिणा सम्पादित:, राष्ट्रीय-संस्कृत विद्यापीठम्, तिरुपति:, २००४.

५. परिभाषेन्दुशेखर: नागेशभट्टप्रणीत:, म.म.कै. तात्यशास्त्रिणा सम्पादित:, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, २०१२ (प्रथमसंस्करणम्)

६. परिभाषेन्दुशेखर: नागेशभट्टप्रणीत:, हर्षनाथमिश्रेण सम्पादित:, राष्ट्रीय-संस्कृत-संस्थानम्, नव-देहली, २०१० (तृतीयसंस्करणम्)

७. परिभाषेन्दुशेखर: नागेशभट्टप्रणीत:, सुबोधिनी हिन्दिव्याख्योपेत:, विश्वनाथमिश्रेण सम्पादित:, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, २०२६.




CamScanner

८. परिभाषासूत्र ओ इष्टिवचन इति ग्रन्थः पशुपतिचन्देन सम्पादितः, सदेशः, कलकाता, ख्रिष्टाब्दः २००४ (प्रथमसंस्करणम्).
९. पाणिनीय वैदिक व्याकरण इति ग्रन्थः अशोककुमारवन्द्योपाध्यायेन सम्पादितः, संस्कृत-पुस्तक-भाण्डारः, कलकाता, शकाब्दः १४१८ (द्वितीयप्रकाशनम्).
१०. महाभाष्यम् पतञ्जलिप्रणीतम्, गङ्गाधरकरन्यायाचार्येण सम्पादितम्, संस्कृत-वुक्-डिपो, कलिकाता, २००२ (प्रथमसंस्करणम)
११. महाभाष्यं पतञ्जलिप्रणीतम्, हरिनारायणतिवारी इत्यनेन सम्पादितम्, चोखम्बा-विद्याभवनम्, वाराणसी, २००१.
१२. वालशिक्षा भवानीशङ्करशर्मणा सम्पादिता, राष्ट्रीयसंस्कृतसंस्थानम्, नव-देहली, २००६ (प्रथमसंस्करणम्).
१३. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिता, अयोध्यानाथ-सान्यालशास्त्रिणा सम्पादिता, वर्धमान्-विश्वविद्यालयः, वर्धमान्, १४१४ (चतुर्थमुद्रणम्)
१४. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिता, मृणालकान्तिगङ्गोपाध्यायः सम्पादिता, संस्कृत-वुक्-डिपो, कलकाता, १४२० (द्वितीयपुनर्मुद्रणम्).
१५. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिता, शर्मालक्षी इत्यलक्षी इत्यनेन सम्पादिता, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, २०१६ (प्रथम संस्करणम्)
१६. वैयाकरणसिद्धान्तकौमुदी (अजन्तपुंलिङ्गप्रकरणम्) भट्टोजिदीक्षितप्रणीता, संकलकः व्याख्याकारश्च अशोककुमारपण्डा, प्रग्रेसिभ्-पावलिशार्स, कलकाता, २०१२ (प्रथमप्रकाशनम्)
१७. वैयाकरणसिद्धान्तकौमुदी (तिङन्तप्रकरणम्) भट्टोजिदीक्षितप्रणीता, पार्वतिचक्रवर्तिना धीरेन्द्रकुमारदासेन च सम्पादिता, संस्कृत-वुक-डिपो कलिकाता २०१४ (प्रथम संस्करणम् चतुर्थमुद्रणम्)
१८. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितप्रणीता, शिवप्रसादशर्मणा सम्पादिता, चौखम्बा-विद्याभवनम्, २००९ (प्रथमसंस्करणम्)
१९. वैयाकरणसिद्धान्तकौमुदी (विभक्त्यर्थप्रकरणम्० भट्टोजिदीक्षितप्रणीता, श्रीधरानन्दधिण्डियाल इत्यनेन सम्पादिता, मतिलाल वानारसिदासः, दिल्ली, २००४ (प्रथमसंस्करणम्, सप्तमुद्रणम्).
२० व्याकरणमहाभाष्यं पतञ्जलिप्रणीतम्, भार्गवशास्त्रिजोशी इत्यनेन संशोधितम्, चौखम्बा-संस्कृत-प्रतिष्टानम्, दिल्ली, २०१४ (पुनर्मुद्रणम्).
२१ व्याकरण दर्शनेर इतिहास इति ग्रन्थः गुरुपदहालदारप्रणीतः, संस्कृत-वुक्-डिपो, कलिकाता, वङ्गाब्दः २४१२ (द्वितीयप्रकाशनम्)

सहाचार्यः संस्कृतविभागः
मुगवेडिया-गङ्गाधर-महाविद्यालयः
भूपतिनगरम्, पूर्वमेदिनीपुरम्, पश्चिमवङ्गः



CamScanner